# ॥ नर्मदाष्टकम् ॥

सबिन्दु-सिन्धु-सुस्खलत्-तरङ्ग-भङ्ग-रञ्जितं
द्विषत्सु पाप-जात-जातकादि-वारि-संयुतम्।
कृतान्त-दूत-काल-भूत-भीति-हारि-वर्मदे
त्वदीय-पाद-पङ्कजं नमामि देवि नर्मदे॥ १ ॥

त्वदम्बु-लीन-दीन-मीन-दिव्य-सम्प्रदायकं
कलौ मलौघ-भार-हारि-सर्व-तीर्थ-नायकम्।
सुमच्छ-कच्छ-नक्र-चक्र-वाक-चक्र-शर्मदे
त्वदीय-पाद-पङ्कजं नमामि देवि नर्मदे॥ २ ॥

महा-गभीर-नीर-पूर-पाप-धूत-भूतलं
ध्वनत्-समस्त-पातकारि-दारिताप-दाछलम्।
जगल्लये महाभये मृकण्डु-सूनु-हर्म्यदे
त्वदीय-पादपङ्कजं नमामि देवि नर्मदे॥ ३ ॥

गतं तदैव मे भयं त्वदम्बु वीक्षितं यदा
मृकण्डु-सूनु-शौनका-सुरारि-सेवितं सदा।
पुनर्-भवाब्धि-जन्मजं भवाब्धि-दुःख-वर्मदे
त्वदीय-पाद-पङ्कजं नमामि देवि नर्मदे॥ ४॥

अलक्ष्य-लक्ष-किन्नरामरासुरादि-पूजितं
सुलक्ष-नीर-तीर-धीर-पक्षि-लक्ष-कूजितम्।
वसिष्ठ-शिष्ट-पिप्पलादि-कर्दमादि-शर्मदे
त्वदीय-पादपङ्कजं नमामि देवि नर्मदे॥ ५॥

सनत्कुमार-नाचिकेत-कश्यपात्रि-षत्पदैः
धृतं स्वकीय-मानसेषु नारदादि-षत्पदैः।
रवीन्दु-रन्ति-देव-देवराज-कर्म-शर्मदे
त्वदीय-पाद-पङ्कजं नमामि देवि नर्मदे॥ ६ ॥

अलक्ष-लक्ष-लक्ष-पाप-लक्ष-सारसायुधं
ततस्तु जीव-जन्तु-तन्तु-भुक्ति-मुक्ति-दायकम्।
विरिञ्चि-विष्णु-शङ्कर-स्वकीय-धाम-वर्मदे
त्वदीय-पाद-पङ्कजं नमामि देवि नर्मदे॥ ७॥

अहो धृतं स्वनं श्रुतं महेशि-केश-जातटे
किरात-सूत-बाडबेषु पण्डिते शठे नटे।
दुरन्त-पाप-तापहारि-सर्व-जन्तु-शर्मदे
त्वदीय-पाद-पङ्कजं नमामि देवि नर्मदे॥८॥

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा
पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा।
सुलभ्यदेहदुर्लभं महेशधामगौरवं
पुनर्भवा नरा न वै विलोकयन्ति रौरवम्॥९॥

॥इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्री-गोविन्द-भगवत्पूज्य-पाद-शिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्री-नर्मदाष्टकम् सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Narmadashtakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits